navagrahAShTottarashatanAmAvaliH

# नवग्रहाष्टोत्तरशतनामावलिः

## Document Information

Text title : Navagraha Ashtottarashatanamavalih (2) 108 Names

File name : navagrahAShTottarashatanAmAvaliH.itx

Category : navagraha, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Acknowledge-Permission: Pandit Shri Rama Ramanuja Acharya, srimatham.com

Latest update : June 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# नवग्रहाष्टोत्तरशतनामावलिः

ॐ भानवे नमः । हंसाय । भास्कराय । सूर्याय । सूराय । तमोहराय ।
रथिने । विश्वधृते । अव्याग्रे । हराय । वेदमयाय । विभवे ।
सुधांशवे । शुभ्रांशवे । चन्द्राय । अब्जनेत्रसमुद्भवाय ।
ताराधिपाय । रोहिणीशाय । शम्भुमूर्तिकृतालयाय ।
औषधीड्याय नमः ॥ २०॥

ॐ औषधीपतये नमः । ईश्वरधराय । सुधानिधये ।
सकलाह्लादनकराय । भौमाय । भूमिसुताय । भूतमान्याय ।
(भूतमान्यसमुभवाय) । समुद्भवाय । आर्याय ।
अग्निकृते । रोहिताङ्काय ।
रक्तवस्त्रधराय । शुचये । मङ्गलाय । अङ्गारकाय । रक्तमालिने ।
मायाविशारदाय । बुधाय । तारासुताय । सौम्याय नमः ॥ ४०॥

ॐ रोहिणीगर्भसम्भूताय नमः । चन्द्रात्मजाय । सोमवंशकराय ।
श्रुतिविशारदाय । सत्यसन्धाय । सत्यसिन्धवे । विधुसुताय ।
विबुधाय । विभवे । वाक्कृते । ब्राह्मणाय । (ब्रह्मण्याय) ब्रह्मणे ।
धिषणाय । शुभवेषधराय । गीष्पतये । गुरवे । इन्द्रपुरोहिताय ।
जीवाय । निर्जरपूजिताय । पीताम्बरालङ्कृताय नमः ॥ ६०॥

ॐ भृगवे नमः । भार्गवसम्भूताय । निशाचरगुरवे । कवये ।
भृत्यखेदहराय । भृगुसुताय । वर्षकृते । दीनराज्यदाय ।
शुक्राय । शुक्रस्वरूपाय । राज्यदाय । लयकृते । कोणाय ।
शनैश्चराय । मन्दाय । छायाहृदयनन्दनाय । मार्ताण्डजाय ।
पङ्गवे । भानुतनूद्भवाय । यमानुजाय नमः ॥ ८०॥

ॐ अदीप्यकृते नमः । नीलाय । सूर्यवंशजाय । निर्माणदेहाय । राहवे ।
स्वर्भानवे । आदित्यचन्द्रद्वेषिणे । भुजङ्गमाय । सिंहिदेशाय ।
गुणवते । रात्रिपतिपीडिताय । अहिराजे । शिरोहीनाय । विषधराय ।

महाकायाय । महाभूताय । ब्रह्मणे । ब्रह्मसम्भूताय । रविकृते ।
राहुरूपधृते नमः ॥ १००॥

ॐ केतवे नमः । केतुस्वरूपाय । खेचराय । कग्रुतालयाय । ब्रह्मविदे ।
ब्रह्मपुत्राय । कुमारकाय । ब्राह्मणप्रीताय नमः ॥ १०८

इति नवग्रहाष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran

*navagrahAShTottarashatanAmAvaliH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*